Postal Regd.No. GAMC- 1553/2022-2024

ISSN 2454-6313

संस्कृत-
साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १६ अङ्क : १९३
जून - २०२२

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹10

## चिन्तनम्

सतीशः गज्जर्

### पुण्यो विद्वत्समागमः

वयम् इहलोके जीवामः। तेन कारणेन इह विद्यमानैः नैकैः सज्जनैः सह समागमः भवति। तत्रापि सामाजिके कर्मणि व्यापृतानां मनुष्याणां जीवनं तु समागमैः परिपूर्णम् इव भवति। मम संस्कृते प्रीतिः वर्तते तस्य मूलम् अपि महापुरुषाणां विचारैः सह सङ्गतिः एव ननु। अहं संस्कृतभारत्यां षोडशवर्षाणि सेवां कृतवान्। तत्र मम प्रधानं कार्यद्वयम् आसीत् – १. अध्ययनम् २. पुण्यपुरुषाणां दर्शनं च।

श्रीकृष्णेन उक्तं यत् आत्मनः उद्धारः आत्मना एव करणीयः। अहम् अत्र किञ्चित् योजयितुम् इच्छामि। श्रीकृष्णः पुनः कथयति यत् यो मे भक्तः आत्मनः उद्धारं कर्तुम् इच्छति तम् अहं महापुरुषैः सह योजयामि।

मम संस्कृतमये जीवने केचन महात्मानः आत्मीयाः अभवन्। तेषाम् एकतमः वर्तते परमः वैयाकरणः श्रीमान् वसन्तः भट्टः। आदौ भट्टवर्येण विरचितं 'संस्कृतवाक्यसंरचना' ग्रन्थरत्नं दैवयोगात् मम हस्ते निपतितम्। तस्य अध्ययनेन अहं प्राथमिकं संस्कृतं ज्ञातवान्। संस्कृतभाषायाः गभीरम् अध्ययनं कर्तुम् एतस्मात् पुस्तकात् एव प्रेरणां प्राप्तवान्। वस्तुतः एतत् पुस्तकं संस्कृतभाषां प्रवेष्टुं द्वारम् अस्ति – हरिद्वारम् अस्ति। मम कृते तु तत् 'भगवद्गीता' अभवत्। अद्यापि अहं बहूनां प्रश्नानाम् उत्तरम् अस्मिन् पुस्तके अन्विष्यामि। पुस्तकम् अपि कदापि मां निराशं न करोति।

पञ्चतन्त्रे विद्यमाना मकरस्य कथा भवद्भिः पठिता स्यात् एव। पुस्तकस्य आस्वादनं कृत्वा मया अपि चिन्तितं यत् ग्रन्थकारस्य दर्शनम् अपि 'मधुरम्' स्यात्! कदाचित् असूचयित्वा एव तस्य भट्टवर्यस्य गृहं प्रविष्टः। तदानीं विनीतवेशस्य तस्य हस्ते भागवतम् आसीत् इति स्मरामि। सः परिचयात् अनन्तरम् आत्मप्रशंसाम् अपि कृतवान्। किन्तु मम कृते 'विश्वरूपदर्शनम्' आसीत्! आत्मरूपं प्रकटय्य सः मां भोजितवान्। महोदयस्य गृहे पाकशालायां लघु छिद्रम् आसीत्। गुरुमाता ततः उष्णां रोटिकां प्रेषयति स्म। तत् भट्टवर्येण सह मम प्रथमं मेलनम्।

मासद्वयात् पूर्वमेव मम 'प्रतिबिम्बम्' नाम नाटकं प्रकाशितम्। भट्टवर्याय अहं तत् 'सभयम्' प्रेषितवान्। भयस्य कारणं स्पष्टम् आसीत्। अहं संस्कृतच्छात्रः, सः विद्वत्पुरुषः। कुपितः सः आदेष्टुम् अर्हति – 'भवान् सर्वाणि पुस्तकानि जलदेवाय समर्पयतु!' परन्तु तथा न अभवत्। सः परमां तुष्टिम् अनुभूतवान्। रात्रौ विलम्बेन सम्भाषणं कृतवान्। मां मधुरेण कण्ठेन अवदत् – 'अद्य मया परिपक्वं फलं दृष्टम्।' मया सविनयं निवेदितं यत् – 'महोदय! भवतः कृपादृष्टेः फलम् इदम्।' तेनापि उक्तं यत् – 'गुरुः शास्त्रं दातुं शक्नोति, परन्तु प्रतिभायाः अधिकारी शिष्यः एव भवति।'

(अनुसन्धानम् ५ पृष्ठे...)

## न दृष्टः पलायनाय मार्गः



तुलसीदासः श्रेष्ठः कविः । तस्य कश्चन लघुः आश्रमः आसीत् वाराणस्याम् । तस्य केचन भक्ताः अपि आसन् । तस्य अत्यधिकः समयः यापितः भवति स्म 'रामचरितमानस' ग्रन्थस्य लेखने । सः ग्रन्थः आसीत् पद्यमयः । मन्देन स्वरेण पद्यानि गायन् सः लिखति स्म । यदि कश्चित् तानि पद्यानि शृणोति तर्हि ततः निर्गन्तुं मनः न प्राप्नोति स्म । बहवः भक्ताः आश्रमभूमौ उपविश्य तदीयस्य गानस्य श्रवणेन कालं यापयन्ति स्म ।

तुलसीदासस्य आश्रमस्य समीपे लुण्ठाकः तिमः वसति स्म । चौर्यापराधनिमित्तम् आरक्षकभटैः सः बहुधा गृहीतः आसीत्, कारागारे स्थापितः आसीत् च । तथापि सः तु चौर्यवृत्तिम् अनुवर्तयति स्म एव ।

तिमः तुलसीदासस्य आश्रमं परीक्षादृष्ट्या परिशीलयति स्म । आश्रमस्य द्वारं सदा उद्घाटितं भवति स्म । कोऽपि रक्षकः अपि न भवति स्म तत्र । एतत् तिमस्य कुतूहलम् अवर्धयत् । कदाचित् केचन भक्ताः गुरुवन्दनाय आश्रमम् आगतवन्तः । तिमः अपि तान् अनुसरन् आश्रमं प्रविष्टवान् । ते भक्ताः आसन् वणिजः । नगरात् आगताः आसन् ते । प्रभूतं धनम् अपि आसीत् तेषां समीपे । ते आश्रमं प्रविश्य आश्रमस्य कोणे स्ववस्तूनि स्थापयित्वा पद्यश्रवणाय ततः निर्गतवन्तः ।

तिमः तान् अनुसरन् आसीत् एव । तेषां स्यूतानाम् उपरि तस्य विशेषदृष्टिः आसीत् । एतदभ्यन्तरे तुलसीदासेन क्रियमाणं काव्यश्रवणं तेन श्रुतम् । कदा तेषु पद्येषु आकर्षणम् उत्पन्नम् इति सः एव न जानाति स्म । दीर्घकालं यावत् सः पद्यानि शृण्वन् उपविष्टवान् । यदर्थं तेन आश्रमः प्रविष्टः सः उद्देशः अपि विस्मृतः आसीत् तेन ।

अनन्तरदिने तिमः पुनरपि आश्रमम् आगतवान् । पूर्वदिने यथा जातं तथैव प्रवृत्तम् अद्यापि । प्रतिदिनम् अपि सः आश्रमं प्रति आगमनम् आरब्धवान् । अल्पे एव काले आश्रमं प्रति आगन्तृभिः सर्वैः सः ज्ञातः जातः । सर्वे चिन्तितवन्तः यत् अयमपि संन्यासिनः भक्तः, तदीयपद्यानां श्रवणे आसक्तः च इति । किन्तु तिमः तु आश्रमात् सम्पत्तेः अपहरणाय अवकाशं प्रतीक्षते स्म ।

एकदा मध्याह्ने सारनाथतः कश्चन श्रेष्ठी कानिचन बहुमूल्यानि वस्तूनि क्रेतुं नगरं गच्छन् आश्रमम् आगतवान् आसीत् । आश्रमात् अनतिदूरे किञ्चन शिवमन्दिरम् आसीत् । तत्र कश्चन उत्सवः आसीत् तद्दिने । तम् उत्सवं समाप्य रात्रिम् आश्रमे यापयित्वा अग्रे गन्तुम् इच्छति स्म श्रेष्ठी । एतत्सर्वम् आश्रमजनैः सह श्रेष्ठिना कृतात् वार्तालापात् अवगतवान् तिमः ।

एतं श्रेष्ठिनं जानाति स्म तिमः । पूर्वं कदाचित् सारनाथे श्रेष्ठिनः आपणात् वस्तूनां चौर्यसमये भटैः गृहीतः अपि आसीत् सः । श्रेष्ठी तं दृष्ट्वा अपि तं न अभिज्ञातवान् 'एतत् तु सौभाग्यकरम् एव । अद्य एतस्य सम्पत्तेः अपहरणाय अवकाशः प्राप्तः अस्ति' इति अचिन्तयत् तिमः ।

यदा अन्धकारप्रसारः आरब्धः तदा श्रेष्ठी आश्रमजनाः च सर्वे शिवमन्दिरं प्रति प्रस्थितवन्तः । आश्रमे संन्यासी एकः एव दृश्यते स्म, नान्यः कोऽपि । 'अहो, मम सौभाग्यम्' इति चिन्तयन् सन्तुष्टः अभवत् तिमः ।

'मयि चौर्यस्य आरोपः यथा न स्यात् तथा करणीयम्' इति निश्चित्य सः संन्यासिनः प्रकोष्ठं गतवान् ।

संन्यासी तं दृष्ट्वा मन्दहासं प्रकटयन् अपृच्छत् – "किं भवान् मां किमपि वक्तुम् इच्छति ?" इति ।

"अहं गृहं प्रति गच्छन् अस्मि । आश्रमे भवतः ऋते अन्यः कोऽपि न दृश्यते इव" इति अवदत् तिमः ।

"अन्यः कोऽपि नास्ति इति केन उक्तम् ? भवान् चिन्तां मा करोतु वत्स !" इति अवदत् संन्यासी ।

"कोऽपि नास्ति इति केन किमर्थं वक्तव्यम् ? प्रत्यक्षदर्शनात् एव तत् ज्ञायते । सर्वाणि द्वाराणि उद्घाटितानि सन्ति । रक्षकः अपि कोऽपि नास्ति" इति अवदत् तिमः ।

"द्वाराणि उद्घाटितानि सन्ति, रक्षणं च किमपि नास्ति इति केन वा उक्तम् ?" इति पृच्छन् संन्यासी ताडपत्राणां पठने उद्युक्तः अभवत् । क्षणकालानन्तरं तिमः विना शब्दं ततः निर्गत्य श्रेष्ठिनः स्यूतं स्वीकृतवान्, द्वारस्य दिशि गतवान् च ।

किन्तु किं तत्र पश्यति सः । तत्र धनुर्धारी बाणहस्तः द्वारस्य पुरतः तिष्ठति ! ! 'एषः कश्चन नटः स्यात् । उत्सवात् प्रत्यागत्य स्वस्य बान्धवान् प्रतीक्षमाणः स्यात्' इति विचिन्त्य तिमः अपरस्य द्वारस्य समीपं गतवान् । तत्रापि सः एव पुरुषः दृष्टिगोचरः जातः । देवालयात् श्रेष्ठिनः प्रत्यागमनात् पूर्वं तिमेन ततः निर्गन्तव्यम् एव आसीत् । अतः तृतीयस्य द्वारस्य समीपं गतवान् सः । आश्चर्यं नाम सः रक्षकपुरुषः अपि तत्र उपस्थितः आसीत् ।

'तिष्ठतु नाम एषः अत्र । अहं चतुर्थात् द्वारात् निर्गमिष्यामि' इति विचिन्त्य तिमः चतुर्थद्वारसमीपं गतवान् ।

"वत्स ! किम् एतत् ? किमर्थं भवान् द्वारात् द्वारं प्रति एवं गच्छन् अस्ति ?" इति अपृच्छत् संन्यासी ।

तिमः संन्यासिनः पादयोः पतितवान् । संन्यासी तं प्रीत्या उन्नीतवान् ।

"श्रीमन् ! मया किमेतत् दृश्यते ? कः एषः भवतः आश्रमम् एवं रक्षति ?" इति आश्चर्येण पृष्टवान् तिमः ।

"किमर्थम् आश्चर्यम् ? सः अस्ति लोकबन्धुः । भवतः अपि बन्धुः एव सः । सः न तिष्ठति दूरे । भवतः हृदये एव वसति सः । सः एव अस्ति भगवान् रामः" इति मन्दहासपूर्वकम् अवदत् संन्यासी ।

तिमः पश्चातापं प्रकटयन् पुनः अपि संन्यासिनः पादौ गृहीतवान् । "महात्मन् ! क्षन्तव्यः अहम् । अहमस्मि पापी" इति अश्रूणि स्रावयन् अवदत् सः ।

"भवान् पापी न सर्वथा । भवता भगवान् रामः प्रत्यक्षं दृष्टः अस्ति । अतः भगवदनुग्रहपात्रं भवान्" इति अवदत् संन्यासी ।

तस्मिन् एव दिने तिमः तस्य संन्यासिनः शिष्यः जातः आजीवनः च तत्रैव अवसत् सः संन्यासिनः प्रियशिष्यत्वेन ।

## कृतिपरिचयः ( चारुचर्या )

व्योम शाहः

संस्कृतसाहित्याम्बुधौ बहवोऽपि कवयः स्वकीयाभिः गद्यपद्यसर्जनप्रतिभाभिः संस्कृतरसिकानां जगति अनन्यां कीर्तिम् अलभन्त। प्राचीनस्य भारतस्य साहित्यस्य परिशीलनेन एव अवगम्यते यत् कतमं वैचारिकस्तरं भारतीयैः आप्तम्।

अस्मिन्नेव साहित्यजगति बहुभिः साहित्याम्भोधिगाहकैः रत्नगवेषणा कृता। एभिः एव अद्य अपि संस्कृतजगत् विशेषं प्रकाशते। एषु एव रत्नगवेषकेषु एकतमः महाकविः क्षेमेन्द्रः। अनेन महाकविना बहूनामपि रत्नानां गवेषणेन अक्षया श्रीः सम्प्राप्ता। उपविंशतीनां कृतीनां संरचनाभिः अनेन कविना संस्कृतसाहित्यं समृद्धीकृतम्। अस्मिन् क्षेमेन्द्रविरचिते साहित्याकरे एकतमा कृतिः 'चारुचर्या' इति।

**कृतेरुद्देशः मानं च** – प्राक् कालात् आरभ्य भारतीयेषु जनेषु कर्तव्याकर्तव्यविषये जिज्ञासा वर्तते स्म। इमाम् एव जिज्ञासां परिपूरयितुं बहूनां नीतिविषयक-ग्रन्थानां रचना विद्वद्भिः कृता। अस्याः कृतेः अपि उद्देशः सः एवः। नीतिविषयकस्य श्लोकस्य मानम् एकाधिकशतश्लोका एव किन्तु विषयस्य गहनता रत्नाकरेण तुल्या। अपि च अत्र महाकविना प्रौढस्य भाषाप्रयोगस्य प्रदर्शनम् अकृत्वा सार्वजनीनीकृता।

**कृतेः वैशिष्ट्यम्** – अस्याः कृतेः विषयः अभिन्नश्चेदपि रचनापद्धत्या इयं कृतिः भिन्नतरा विभाति। अस्यां कृतौ लघोः अनुष्टुभः छन्दसः प्रयोगः कृतः कविना। प्रत्येकस्मिन् अनुष्टुप्-श्लोके नीतिविषयसम्बद्ध-उपदेशेन सह तम् उपदेशं समर्थयितुं पुराणकथालवः प्रदत्तः। तेन एव अवगम्यते यत् अस्यां कृतौ उपदेशाः आख्यायिकाः च सन्ति। कुत्रचित् तस्योपदेशस्य आचरणेन कः पौराणिकः पुरुषः कं लाभम् आप्नोत् इत्यपि उल्लिखति ग्रन्थकारः।

**मङ्गलं ग्रन्थसमाप्तिः च** – महाकविना क्षेमेन्द्रेण ग्रन्थस्य मङ्गले प्रभोः अच्युतस्य-श्रीविष्णोः वाक्पुष्पैः अर्चनं कृतम्। तद्यथा ''श्रीलाभसुभगः सत्यासक्तः स्वर्गापवर्गदः। जयतात् त्रिजगत्पूज्यः सदाचार इवाच्युतः॥'' तथा च ग्रन्थसमाप्तौ महाकविः स्वस्य नाम्नः साक्षाद् उल्लेखं कृत्वा स्वीयं व्यासदासरूपेण विज्ञापितवान् लोके। तद्यथा –

**श्रव्या श्रीव्यासदासेन समासेन सतां मता।**
**क्षेमेन्द्रेण विचार्येयं चारुचर्या प्रकाशिता॥**

**कृतेः आस्वादः** – श्लोकद्वयम् इह कृतिम् आस्वादयितुं दीयते। तद्यथा–

**न सत्यव्रतभङ्गेन कार्यं धीमान् प्रसाधयेत्।**
**ददर्श नरकक्लेशं सत्यनाशाद् युधिष्ठिरः॥५४॥**

विस्तरः– अत्र महाकविः लोकहिताय उपदिशति यत् क्वचित् कदाचिदपि कश्चिद् धीमान् स्वस्य कार्यं साधयितुं अलीकस्य वचनस्य समर्थनं न कुर्याद् न च वदेत्। सत्यव्रतभङ्गकरणत्वाद् एव युधिष्ठिरेणापि नरकस्य दर्शनं कर्तव्यम् अभवत्। अत्र महाभारते स्वर्गारोहणपर्वणि युधिष्ठिरस्य नरकदर्शनस्य कथा वर्तते यत्र युधिष्ठिरेण दृष्टस्य नरकस्यापि वर्णनं विद्यते।

**परप्राणपरित्राणपरः कारुण्यवान् भवेत्।**
**मासं कपोतरक्षायै स्वं श्येनाय ददौ शिबिः॥२३॥**

विस्तरः – लोकमानसे सत्त्वेषु कारुण्यं जागरयितुं व्यासदासः बुधान् उद्दिश्य वदति यत् – मनुष्येण सदा परेषां प्राणानां रक्षणार्थं तत्परेण भवितव्यम्। एवं च सर्वेषु भूतेषु तेन कारुण्यं प्रदर्शयितव्यम्। उदाहरन् स विशेषेण लोकप्रसिद्धां कथां कथयति। पुरा शिबिना कपोतस्य रक्षणार्थं स्वं साक्षात् श्येन-पक्षिणे समर्पितवान्।

एवं बहूनामपि उपदेशानां सङ्ग्रहः अस्यां कृतौ व्यासदासेन कृतः। कृतेः नाम अपि लेखनानुरूपमेव वर्तते इति नास्ति संशयः। 'चारुचर्या' इत्यस्य पदस्य 'चर्या' पदे शङ्का उत्पद्येत यत् कथम् अस्या दिनचर्या निरूपिता ? इति चेद् अस्याः कृतेः आरम्भः जागरणक्रियया समाप्तिश्च तल्पगमनेन कृता येन सम्पूर्णाऽपि आदर्शरूपा दिनचर्या प्ररूपिता। इत्यलं विस्तरेण।

## मासवार्ता

**सम्पन्नः संस्कृतग्रीष्मवर्गः**









मईमासस्य १६ दिनाङ्कतः २६ दिनाङ्कपर्यन्तम् एकलव्य-संस्कृत-एकेडेमी संस्थाने संस्कृतग्रीष्मशिबिरस्य आयोजनम् अभवत्। शिबिरेऽस्मिन् Skg तः ८ कक्ष्यायाः छात्राणां कृते बालसंस्कृतवर्गः, दशमकक्ष्यायाः छात्राणां कृते संस्कृतव्याकरणवर्गः, श्रीमद्भगवद्गीतायाः श्लोकोच्चारणवर्गः च इत्येते वर्गाः आयोजिताः। डॉ. मिहिरः उपाध्यायः, श्रीश्यामः पटेलः, श्रीमती सङ्गीता मिस्त्री च शिक्षकत्वेन छात्रेभ्यः मार्गदर्शनं प्रायच्छन्। संस्कृतस्य अध्ययनं कृत्वा छात्राः सन्तुष्टाः आसन्। अत्र उल्लेखनीयं यत् अयं ग्रीष्मवर्गः online एवं च offline प्राचलत्। वर्गेऽस्मिन् न केवलं अहमदाबादनगरस्थाः छात्राः अपि तु देशविदेशेभ्यः छात्राः भागम् अवहन्। कार्यक्रमोऽयं सफलः।

### पुण्यो विद्वत्समागमः...

महान् वैयाकरणः अपि भक्तियोगेन विना जीवितुं न शक्नोति। भट्टवर्यस्य भक्तियोगः अर्थात् कमलेशचोकसीमहोदयः! गुजरातविश्वविद्यालयस्य पताकास्थानकम् इव भाषाभवनं शोभते। तत्र भट्टवर्येण सह मम असकृत् संयोगः अभवत्। भट्टवर्यस्य प्रकोष्ठे, विष्णोः पुरतः आसीनः ब्रह्मा इव कमलेशवर्यः अपि सदा विलसति स्म। तत्र उभयोः संवादं यः जिह्वाचापलं संयम्य शृणोति सः धन्यः एव।

कोऽपि मनुष्यः कियच्चिरं जीविष्यति इति तर्कयितुं सर्वथा न शक्यते। परन्तु वसन्तभट्टसदृशाः वैयाकरणाः सहस्रं वर्षाणि जीवेयुः इति मम बालिशं मनः कल्पयति।

## कृपया हसन्तु

रमण: - (नमनं प्रति) सम्प्रति तैलस्य मूल्यं दिनानुदिनं वर्धमानम् अस्ति । एतेन सर्वेषां बहुलाभ: जायमान: अस्ति ।

नमन: - तैलस्य मूल्यं वर्धमानं वर्तते । एतेन सर्वेषां लाभ: कथम् ?

रमण: - भो: ! पूर्वं याने सहस्ररूप्यकाणां तैलं पूरयितुं त्रिनिमेषात्मक: समय: अपेक्षित: आसीत् । अद्यत्वे तु एतस्मै कार्याय एकनिमेषस्य समय: एव अपेक्षित: । तर्हि निमेषद्वयस्य समयरक्षणलाभ: जात: खलु सर्वेषाम् ।

★ ★ ★ ★ ★

रमण: - (स्थूलजनान् उद्दिश्य) यदि भवतां भार: पृथिव्यां १०० किलोपरिमित: वर्तते तर्हि स: एव भार: क्रमेण मङ्गलग्रहस्य उपरि ३८ किलोपरिमित: चन्द्रस्य उपरि १६ किलोपरिमित: च भविष्यति । एतस्य अर्थ: यत् भवन्त: स्थूला: न सन्ति । भवतां भार: अधिक: अपि नास्ति । केवलं एतदेव यत् भवन्त: अनुचिते ग्रहे वसन्ति । कृपया शीघ्रं ग्रहपरिवर्तनं कुर्वन्तु ।

★ ★ ★ ★ ★

शिक्षक: - (छात्रान् उद्दिश्य) 'स: वस्त्राणां प्रक्षालनं कृतवान् ।' 'तेन वस्त्राणां प्रक्षालनं करणीयम् अभवत्' एतयो: वाक्ययो: क: भेद: इति स्पष्टं कुरुत ।

रमण: - महोदय ! प्रथमेन वाक्येन जन: अविवाहित: अस्ति इति स्पष्टं भवति । द्वितीयेन वाक्येन जन: विवाहित: अस्ति इति च स्पष्टं भवति ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**केवलं ग्रहनक्षत्रं न करोति शुभाशुभम् ।**
**सर्वमात्मकृतं कर्म लोकवादो ग्रहा इति ॥**

**तात्पर्यम् :–** जीवने कष्टानि दु:खानि यदा आपतन्ति तदा बहव: वदन्ति – ग्रहगति: समीचीना नास्ति इति । किन्तु केवलं ग्रहनक्षत्रादीनां कारणत: अस्माकं जीवने सुखदु:खादय: न भवन्ति । अस्माभि: कृतानां कर्मणां कारणत: एव शुभाशुभफलं प्राप्यते । ग्रहगतिकारणत: इदं जातम् इत्येतत् जनानां वचनमात्रम् ।

**को वीरस्य मनस्विन: स्वविषय: को वा विदेशस्तथा यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम् ।**
**यद्दंष्ट्रानखलाङ्गलप्रहरणात्सिंहो वनं गाहते तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यात्मन: ॥**

**तात्पर्यम् :–** बुद्धिमत: वीरस्य 'इदं मम, इदम् अन्यस्य' इत्येवं भाव: न भवति । अयं मम देश:, अयं विदेश: इति भावोऽपि न भवति । यं देशं गच्छति तमेव देशं स्वपराक्रमेण स्वायत्तं करोति । यथा सिंह: स्वपराक्रमेण समग्रं वनं स्वायत्तं करोति, तथैव स्वपराक्रमेण गजं हत्वा तस्य रुधिरेण स्वपिपासां निवारयति तथैव वीरा: पराक्रमं दर्शयन्ति ।

**को हि भार: समर्थानां किं दूरं व्यवसायिनाम् ।**
**को विदेश: सुविद्यानां क: पर: प्रियवादिनाम् ॥**

**तात्पर्यम् :–** शक्तिमतां क: भार: ? य: परिश्राम्यति तस्य किं दूरम् ? विद्यावत: कोऽपि विदेश: न भवति । य: मधुरं वदति तस्य क: पर ?

## ज्ञानसरिता

श्यामः पटेलः

### शीघ्रगामी पशुः चित्रव्याघ्रः

पशुजगति शीघ्रगामी पशुः अस्ति चित्रव्याघ्रः । सः प्रतिहोरं प्रायशः ११५ किलोमीटरमितया त्वरया धावति। धावनारम्भात् कतिषुचन क्षणेषु एव सः एतां द्रुतगतिं प्राप्नोति। तस्य शरीरे कृष्णवर्णीयाः बिन्दवः भवन्ति। प्रत्येकं बिन्दोः व्यासः अङ्‌गुष्ठपर्वद्वयमितः भवति। नेत्राभ्याम् आरभ्य मुखपर्यन्तं कृष्णवर्णीयाः रेखाः चित्रव्याघ्रस्य विशेषलक्षणम् अस्ति । चित्रव्याघ्रः उच्चैः गर्जनां कर्तुं न शक्नोति यथा सिंहः करोति । सः केवलं बिडालः इव ''म्याऊ'' इति ध्वनिं कर्तुं शक्नोति तथा च क्षणमात्रस्य फूत्कारम् । चित्रव्याघ्रस्य दृष्टिः तु तीक्ष्णा भवति एव । गन्धग्रहणशक्तिः अपि अत्युत्तमा भवति। यया सः भूमिं जिघ्रन् एव मार्गम् अन्वेषयति। चित्रव्याघ्रस्य मुख्यतः पञ्च प्रजातयः विद्यन्ते । 'एशियन', 'नोर्थ-आफ्रिकन', 'साउथ-आफ्रिकन', 'सुदानी' तथा च 'टाञ्झानियन' इति । धावनसमये चित्रव्याघ्रस्य शरीरस्य उष्णमानं ५० प्रतिशतं वर्धते । सः शीघ्रगामी अस्ति । किन्तु दीर्घकालपर्यन्तं शीघ्रतया धावितुं न समर्थः। चित्रव्याघ्रः एवं तु भयङ्करः भाति। किन्तु सः स्वयं तु अन्येभ्यः हिंसकपशुभ्यः भीतः एव भवति। अतः सः कदापि अन्यैः हिंसकपशुभिः सह युद्धं न करोति।



चित्रव्याघ्रः - leopard
फूत्कारः - snort
शीघ्रगामिन् - fast runner
उष्णमानम् - temperature

## शब्दमञ्जूषा

| | |
|---|---|
| सङ्घः | union |
| ब्रह्माण्डम् | universe |
| विश्वविद्यालयः | university |
| साहसम् | valour |
| भिन्नभिन्नम् | various |
| उपाध्यक्षः | vice chairman |
| कुलपतिः | vice chancellor |
| सन्निधिप्रदेशः | vicinity |
| विजयः | victory |
| खलनायकः | villain |
| गुणः | virtue |
| मतम् | vote |
| मतदाता | voter |
| प्रतिज्ञा | vow |
| गृध्रः | vulture |

## किं भवन्तः जानन्ति ?

**१ ) रावणस्य कति शिरांसि आसन् ?**
(क) अष्ट (ख) नव (ग) दश (घ) एकादश

**२ ) श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति ?**
(क) १८ (ख) २० (ग) २१ (घ) २२

**३ ) द्वापरयुगे कति दिव्यवर्षाणि उक्तानि सन्ति ?**
(क) १,३०० (ख) १,५०० (ग) २१०० (घ) २,४००

**४ ) रामायणग्रन्थे कति श्लोकाः सन्ति ?**
(क) १०,००० (ख) २४,००० (ग) ५०,००० (घ) ६०,०००

**५ ) मल्लयुद्धे कति प्रकारकानि मण्डलानि भवन्ति ?**
(क) ३ (ख) ४ (ग) ५ (घ) ६

**६ ) कति वसवः उक्ताः सन्ति ?**
(क) ५ (ख) ७ (ग) ६ (घ) ८

**७ ) कति प्रजापतयः मताः सन्ति ?**
(क) १० (ख) २० (ग) ३० (घ) ४०

उत्तराणि – (१) ग (२) क (३) घ (४) ख (५) ख (६) घ (७) क

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
।। जयतु संस्कृतं जयतु भारतम् ।।

**Learn Online**

## सन्धिः

**Date** : 13/06/2022 to 13/07/2022
**Day** : Monday - Wednesday
**Time** : 06:30 am to 8:00 pm
**Fees** : Rs. 3000/-

**Learn Online**

## स्तोत्रपाठः

**( शिवपूजनम्, शिवमहिम्नः स्तोत्रं च )**

**Date** : 05/07/2022 to 04/08/2022
**Day** : Tuesday - Thursday
**Time** : 06:30 am to 8:00 pm
**Fees** : Rs. 2500/-

**Contact: Dr Mihir Upadhyay - 98246 16237**

EKLAVYA SANSKRIT ACADEMY
।। जयतु संस्कृतं जयतु भारतम् ।।

**Value Education Through Sanskrit**

## बालसंस्कृतवर्गः

**Class Skg to 8**
**Online**

**Date** : 11/06/2022 to 25/03/2023
**Day** : Every Saturday
**Time** : 06:00 pm to 07:30 pm
**Fees** : Rs. 6000/-

**Value Education Through Sanskrit**

## बालसंस्कृतवर्गः

**Class Skg to 8**
**Offline**

**Date** : 12/06/2022 to 26/03/2023
**Day** : Every Sunday
**Time** : 11:00 am to 12:30 pm
**Fees** : Rs. 6000/-

**Contact:**
**Dr Mihir Upadhyay - 98246 16237**

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

**प्रियवाचकाः**
- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
।। जयतु संस्कृतं जयतु भारतम् ।।

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006